वसुदेव उवाच :

विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः ।
केवलानुभवानंद स्वरूपः सर्वबुद्धिदृक् ॥ ३.१३ ॥

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ ३.१४।

यथेमे विकृता भावास्तथा ते विकृतैः सह ।
नाना वीर्याः पृथग्भूता विराजं जनयंति हि॥ ३.१५ ॥

सन्निपात्य समुत्पाद्य  दृश्यन्तेऽनुगता इव ।
प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥ ३.१६ ॥

एवं भवान् बुध्यनुमेय लक्षणैः
ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः ।
अनावृतत्वाद्  बहिरतरं न ते
सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ ३.१७॥

य आत्मनो दृश्य गुणेषु सन्निति
व्यवस्यते  स्वव्यतिरेकतोऽबुधः ।
विनानुवादं  न च तन्मनीषितं
सम्यग् यतस्त्यक्त मुपाददत् पुमान् ॥ ३.१८॥

त्वत्तोऽस्य जन्मस्थिति संयमान् विभो
वदंत्यनीहादगुणादविक्रियात् \
त्वईश्वरे ब्रह्मणी नो विरुध्यते
त्वदाश्रयत्वादुपचर्यते गुणैः ॥३.१९॥

न त्वं त्रिलोकस्थितये स्व मायया
बिभर्षि शुक्लं खलु वर्णमात्मनः ।
स्वर्गाय रक्तं  रजसोपबृंहितं

कृष्णं च वर्णं तमसा जनात्यये ॥३.२० ॥

त्वमस्य लोकस्य विभो रिरक्षिषुः
गृहेवऽतीर्णोसि ममाखिलेश्वर ।
राजन्य संज्ञासुरकोटि यूथपैः
निर्व्यूह्यमाना निहनिष्यसे चमूः ॥३.२१ ॥

अयं त्वसभ्यस्तव जन्म नौ गृहे
श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर ।
स तेऽवतारं पुरुषैः समर्पितं
शृत्वाधुनैवाभि सरत्युधायुधः ॥ ३.२२ ॥

इति श्रीमद्भागवतसंहितायाम् तृतीय सर्गे वसुदेवस्तवः ॥